श्रीगणेशायनमः ॥ विघ्नेश्वरंनमस्कृत्यरामोपाध्यायनन्दनः ॥ गणपतिस्तनुतेटीकांखंडकाव्यस्यवेस्फुटां ॥ अथप्राक्तनकर्मोपबी
पमानपुण्यपरंपरापादितमहानुभवोतिविततभुवनतलसंपदाःप्रतरोहिजन्मांचोरामिधानः कल्पितप्रथमयौवनाचलस्थितशोभोत्क
र्षवसाकयाचिद्राजपुत्र्यासहसंसारसुखमनुभवन्नकश्चिदवलोकपन्नतस्याराजपुत्र्याबभूतदिवसोपचितंमन्मथविकारमुपलभ्यजुनजनैः
प्रकटितमन्मथविकोरसतिनपाल्लयादंडनायकपुत्रैरुद्धनापबध्यमिनीयमानश्चोरःपूर्वानुभूतसुखस्मृतिममिनयन्नघापीतिपेचा
शङ्किःश्लोकैकदेशकात्मविनोदायस्वस्थतिमेवप्रायोभूयस्यश्लंतवान् ॥ तद्यथा ॥ अघापितांकनकचंपकदामगौरीम् ॥ सुवर्णचंपकमालेवपी
तांगीम् ॥ एतेनगात्रलावण्यमुक्तंवर्णोत्कर्षश्चगौरयीतिकर्णश्चेतरानिविशेषः । पुनःकथंभूताम् । फुल्लारविन्दवदनाम् । फुल्लविकसितपद
रविंदंतद्वद्वदनमास्यंयस्याःसाताम् । प्रहसितमुखीमित्यर्थः । पुनःकथंभूतांतां । तनुरोमराजीम् । तन्वीसूक्ष्मारोमराजीरोमावलीयस्याःसा
अघापितांकनकचंपकदामगौरीं फुल्लारविंदवदनांतनुरोमराजीम् ॥ सुप्तोत्थितांमदनविह्वलसालसांगीं विघांप्रमादगलितामिवचिं
तयामि ॥ १ ॥ अद्यापितांशशिमुखीं नवयौवनाढ्यांपीनस्तनीं पुनरहंपदिगौरकांतिं ॥ पश्यामिमन्मथशरानपीडितांगीं गात्राणिसंप्र
तिकरोमिसुशीतलानि ॥ २ ॥ ॥ तांमा पुनःकथंभूतांतां । सुप्तोत्थितां । सुप्तश्चासौउत्थितश्चसुप्तोत्थितातां । रात्रिजागरणवशाच्चिरंसुप्तोत्थि
तामित्यर्थः । पुनःकथंभूतांतां । तनुरोमराजीं । मदनविह्वलसालसांगीम् । मदनेनपुष्पकेतुनाविह्वलमनएवसालसंअंगंविग्रहोयस्याःसाताम् । कामि
वस्मरामि । विघामिववाग्देवतामिव । कथंभूतांविघाम् । प्रमादगलितांम् । प्रमादेनानवधानेनगलिच्युतांताम् । विस्मरणमागतामित्यर्थः । विघानाम्नीति
कोचित्ज्येष्ठस्त्रीनामग्रहणेयोग्यत्वात् । तदुक्तम् । शापरोगाभिभूतस्यवध्यस्याव्यक्तकर्मणः । गुरोर्ज्येष्ठकनिष्ठस्यकीर्त्तनंपापकारणम् । ननुव्यभिचारेजा
नेनत्वंत्वमेवास्याःकथमितिचेन्न सत्यम् । गंधर्वविवाहेनपत्नीत्वमस्याजातत्वात् । अन्यलोकपरंपरयातांकिंपत्न्येवप्रमाणम् ॥ १ ॥ अद्यापिइदानींमपिम
रणकालेपि । यदिपुनस्तांतथाभूतांपूर्ववत्सवागतांपश्यामि । तदासंप्रतिइदानींमेवगात्राणिसुशीतलानिकरोमीतियोजना । सुखजनकानिचतानिशीतलानिच
सुशीतलानिइतिविग्रहः । कथंभूतांताम् । शशीमुखीचन्द्रवदनाम् । अतएवशैत्येनसुशीतलानिगात्राणिइत्याशयः । पुनःकथंभूतांताम् । नवयौवनाढ्यां । नवं
नूतनंयौवनंतारुण्यंतेनअढ्यायुक्तांता । पुनःकथंभूतांताम् । पीनस्तनीं । पीनौस्थूलौस्तनौवक्षोजौयस्याःसाताम् । पुनःकथंभूतां । गौरकांतिंमनोहरशोभायु
क्तांम् । पुनःकथंभूतांम् । मन्मथशरैरतिपीडितांगांम् । कामबाणस्यैवबाणवानतोत्रिस्तेनपीडितंदग्धंअंगंशरीरंयस्याःसाताम् ॥ २ ॥

अघापिददानीमपिप्राणेशगमावसेतंपश्यदितांपुनःपश्यामिअवलोकयामितदाबाजयुगलेनसर्पाऽयनिर्दयमालिंग्यत
स्यावऋमुखंपिबामिकिंवतज्ञानशून्यवतपुनःकिमिवमधुकरःदृष्टंवांछितंकमलंपद्ममिव·पथाभ्रमरदृष्टंवांछितंकमलं
कमलांतर्गतमुमधुपिबामितथाहमपितद्वक्त्रांतर्गतममृतंपिबामिइत्याशयः।तथाशब्दद्वार्थेकयंभूतांकमलायतांक्षी
कमलवत्आयतेदीर्घेअक्षिणीयस्याःसातांम·पुन·कथंभूतांताम·पीवरपयोधरभारखिन्नाम्पीवरौपुष्टौपयोधरौकु
चौतयोर्भारःगौरवंतेनखिन्नाविश्रांतांताम्॥३॥अघापितामेतादृशींस्मरामिकादृशींनिधुवनकूजनिःसहांगीम्॥निधुवनकू
जनंसुरतश्रमेणनिःसहंसालसंअङ्गंयस्याःसातांम·पुनःकथंभूतांआपांडुगंडपतितालककुन्तलांम्आईषत्पांडुचसेरोयो
गंडौतयोःपतिताअलकानांकेशरचनाविशेषयुक्तानांचिकुराणांभालीसमूहोयस्यास्यातांम।पुनःकिंभूतांअतः अं

अघापितांयदिपुनःकमलायतांक्षींपश्यामिपीवरपयोधरभारखिन्नांम्संपीड्यबाहुयुगलेनपिबामिवऋमुन्मत्तच
न्मधुकरःकमलंयथेष्टं॥३॥अघापितांनिधुवनकूजनिःसहांगींमापांडुगंडपतितालककुन्तलांप्रच्छन्नपापकृतमन्मथबाधां
तांकेशवसऋमृदुबालकृतांस्मरामि॥४॥अघापितांस्करतजागरघूर्णमाननिर्यग्बलत्तरलतारकदीर्घनेत्रांमृगशिशु
सारकमलाकारराजहंसीव्रीडाविनम्रवदनांमुषिसिस्मरामि॥५॥ ॥ ॥

तःकरणेमत्स्मरणभावहेतोःघरपतेःकिमिवप्रछन्नपापकमश्वप्रछन्नंगुप्तंयत्पापंतेनकृतंकर्मइवपुनःकिंभूतांकेशवशऋबालकृतां
केशेअवशंऋमृदुकोमलंबालंकृतंभुजवल्लीयस्याःसातांम॥४॥अघापिददानीमपिउषसिप्रातःसमयेव्रीडादिनमवदनांतांस्म
रामिव्रीडयालज्जयाविनम्रंअवनतंवदनंमुखंयस्याःसातांरात्रिरतनमनुभयप्रातःसमयेमुखंदर्शयितुमशक्तांभवतीत्युत्प्रेक्ष
णंकिंभूतांसुरबलजागरघूर्णमाननिर्यग्बलत्तरलतारकदीर्घनेत्रांसुरतार्थंनिधुवनार्थंपश्चाज्जागरंनिद्राभावस्तेनघूर्णमानेआरक्तमा
नेनिर्यग्बलतीवक्रीभूयमानेतरलतारकेचंचलाक्षिकनीनिकेदीर्घविशालेनेत्रेलोचनेयस्यांसातांपुनःकथंभूतांशृंगारसारकमलाकार
राजहंसींशृंगारसारोयत्रतत्कलिंगहंतदेवकमलाकरःकेलिसरोवतरंतस्यराजहंसीतांराजहंसीमिवविहरणशीलांएतेनोनमजातिपत्नि
नीत्युक्ताभवति॥५॥ २

अघापिददानींमिपिप्राणेशंयदिपुनस्तांपश्यामितदानयनेलोचनेनउन्मीलयामिनप्रकाशयामिकिंकृत्वाअंगैःप्रतिगात्रैरंगैर्दानिष्ठुरं
यथास्यादेवंसमुपागृह्यातिगाढंयतेपीडनंतत्रमपिनचलांत्यजामिनमुंचामिकिंभूतांताम्श्रवणायताक्षीश्रवणपर्यंतंआयतेदीर्घे
अक्षणीलोचनेयस्याःसातांम्पुनःकिंभूतांमदीर्घविरहज्वरितांगयष्टिंदीर्घविरहेणमदविश्लेषेणज्वरितापीडितांअंगयष्टिःगात्रंश्रेष्ठंय
स्याःसातांम्।यष्टिशब्देउत्तरपदेश्रेष्ठार्थः॥अन्योपिकश्चिज्ज्वरितपुरुषांतरेणगाढंआलिंग्यतेसोपिविगलितज्वरोभवतीतिवैद्यमतःकुश
पि॥६॥अघापिजीवनमन्देपितांस्मरामिकिंभूतांतांपूर्णेदुसुंदरमुखींपूर्णःपार्वणोयइंदुश्चंद्रस्तद्वत्सुंदरंमुखंवदनंयस्याःसांपु
नःकिंभूतांसुरतताण्डवसूत्रधारींसुरतंनिधुवनदेवतांउन्मत्तंतस्यसूत्रधारीअग्रसूचकांताम·पुनःकिंभूतांमदविह्वलांगींमदेनमत्तन

अघापितांयदिपुनःश्रवणायताक्षींपश्यामिदीर्घविरहज्वरितांगयष्टिं॥अंगैरहंसमुपगृह्यतेनोपिगाढंनोन्मीलयामिन
यनेनचतांत्यजामि॥६॥अघापितासुरततांडवसूत्रधारींपूर्णेदुसुंदरमुखींमदविह्वलांगीम्॥तन्वींविशालजघन
स्तनभारखिन्नांव्याकोलकुन्तलकलापवतींस्मरामि॥७॥अघापितांमसृणचंदनपंकमिश्रकस्तूरिकापरिमलो
ल्बणसर्वगंधाम्अन्योन्यचंचुपुटचुम्बनरक्तचुरीटयुग्माभिरामनयनांशयनेस्मरामि॥८॥

यांविह्वलंशिथिलंअंगंदेहोयस्याःसातांम·यद्वा·मदोहर्षस्तेनविह्वलंअंगंयस्याःसातांम·पुनःकिंभूतांम·विशालजघनस्तनभा
रखिन्नांविशालोयेजघनस्तनाःश्रोणिपयोधरास्तेषांभारोगौरवंतेनखिन्नांअन्योपिमद्भाराक्रांतःसन्खिन्नोभवतीति
तात्पर्यंपुनःकिंभूतांव्याकोलकुन्तलकलापवतीम·व्याकोलाःकुंतलाःकेशास्तेषांकलापःसमूहोविद्यतेयस्याःसांताम·एतेनवि
परीतरतांभिलाषिताकथिता॥७॥अघापिमरणासमयेपितांशयनेमहंपश्याम्येतादृशींस्मरामि·कीदृशींम्मसृणचंद
नपंकमिश्रकस्तूरिकापरिमलोव्याप्तसर्वगंधाम्मसृणाश्चिक्कणोयश्चंदनपंकोमलयजकर्दमस्तेनमिश्रायाकस्तूरि
कान्हगनाभिस्तस्याःपरिमलोविमर्दोयस्मिंस्तोरभस्तस्मादुत्थाउत्पन्नाविसर्पिसंचारीयोगंधःसोरभःसविद्यतेयस्याःसांताम·अ
इंकोचमत्वर्थेइतिअस्त्यर्थेअथप्रत्ययःविमर्दोयेपरिमलोगंधेजनमनोहरेइत्यमरःकथंभूतांसांमअन्योन्यचंचुपुटचुंबन
खंजरीयुग्माभिरामनयनांम्अन्योन्यस्यपरस्परस्यचंचुपुटेनचंचुकसंपुटेनचुंबनंयस्यएतादृशंयत्खंजरीटयुग्मंखंजनयु
गलंतद्वदभिरामेमनोहरेनयनेलोचनेयस्यारसांताम्॥८॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अद्यापिपाणेापगमनसमयेपि·तांनिधुवनेसुरतेएतादृशींस्मरामिचित्रयामिकीदृशीम·मधुपानरक्तांमधुप्यनेनमद्यमानेनरक्तोलोहितमुखीं·यद्वामधुपानरक्तांमधुमद्यपुष्परसेइत्यमरः पुनःकिंभूतांतामलीलाधारामलीलौहेलांधारयतीतिविभर्त्तीतिलीलाधरानाम·हेलालीत्यमीहवाःक्रियाःशृंगारजाइत्यमरपुनःकिंभूतां·कृशतनुम·कृशाक्षामातनुशरीरंयस्याःसातांम·पुनःकिंभूतांम·चपलायनाक्षीम्आयनेदीर्घेक्षिणीयस्याःस्यातांम·पुनःकिंभूतांम·काश्मीरंधम्रगनाभिकृतांगरागांम·काश्मीरःकुंकुमंगंधश्चंदनंम्रगनाभिःकस्तूरिकास्तैःकृतांगरागःशरीरलेपोयथासातांम·पुनःकिंभूतांमक

अद्यापितांनिधुवनेमधुपानरक्तांलीलाधरांकृशतनुंचपलायताक्षींकाश्मीरगंधम्रगनाभिकृतांगरागांकर्पूरपृगपरिपूर्णमुखींस्मरामि॥९॥अद्यापितत्कनकगौरकृतांगरागंप्रस्वेदविंदुविततंवदनंप्रियायाःअन्येस्मरामिरतिखेदविलोलनेत्रंराहूपरागपरिभुक्तमिवेन्दुबिंबम्॥१०

पूंरपृगपरिपूर्णमुखींम·कर्पूरोघनसारापृगंपूगीफलंताभ्यांपरिपूर्णंपूरितंमुखंयस्याःसातांम·घनश्चारश्चंद्रसंतःकर्पूरइत्यमरापृगःकंमुकइंदयोरित्यपिअद्यापिप्राणगमनकालेपिप्रियायाप्राणवल्लभायास्तस्यर्वदनंमुखम·एतादृशंस्मरामि·कीदृशंराकनकगौरकृतांगरागम·कनकगौरेणकुंकुमेनकृतअंगरागास्तिलकोपत्रतनकनकगौरंकुंकुममितिविश्वःकिंभूतंतद्वदनम·अंतेस्करतमध्येप्रस्वेदबिंदावितंतमप्रेतदविन्दुभिर्घर्मजलकणैर्वितंव्याप्तम·किंभूतमरतिरतिखेदविलोलनेत्रम·रतिखेदेनसुरश्रमेणविलोलेचंचलेनेत्रेलोचनेयस्ययत्रवावनकिंमिवसारमिराहूयरागपरिभुक्तंइंदुबिंबमिवराहोःसैंहिकेयस्यापरागउपरागस्तेनपरिभुक्तंपीतरसमिंदम·उत्तमिवस्मरामिएतेनमुखस्यसंपूर्णनिर्मलताचोक्ता॥९॥ ॥ ॥

अद्यापिउद्बन्धनसमयेपि·तन्मेनासिचित्तेसंपरिवर्त्ततेतिष्ठतितांक्षितिपालपुत्र्यानरपराजकन्यामपिक्षतवतिसतिक्षिप्तांकुर्वतिसतिकोन्यःपुंजनितकेलिक्रोधात्जीवितमंगलवचःकलगणवचनंपरित्यत्यत्कायत्कनकपत्रंआमरणविशेषम·कर्णेशुंतोद्धृतंआरोपितंमृतत्संपरिवर्त्तनेप्रण्वस्थायांसमुद्भूतकेलिकलहोपजातक्रोधवशेनकर्णादपनीयभूमौक्षिप्तम·पश्चाद्रात्रोमापिक्षतवतिसतिनेंदुमश्मिनिमनासिसंधायअवैधाव्यप्रेमातिशयसूचकत्वेनकर्णपाशातिथिंकृतवतीत्यर्थः किंभूतयाक्षितिपालपुत्र्या॥अरालकेश्या॥अरालाहृजिनाःकेशाश्चिकुरायस्यासातपाअरालंवजिनंजिह्मंवक्रमित्यमरः अनालभ्येचेतिपाठेमौनपरयाइत्यर्थः॥११॥अद्यापिमरणसमयेपिप्रिया

अद्यापितन्मनसिसंपरिवर्त्ततेमेरात्रौमापिक्षतवतिक्षितिपालपुत्र्याजीवितमंगलवचःपरित्यकोपात्कर्णेकृतंकनकपत्रमरालकेश्या॥११॥अद्यापितत्कनककुंडलघृष्टगंडमास्यंस्मरामिविपरीतरताभियोगेआंदोलनश्रमजलस्फुटसान्द्रबिंदुमुक्ताफलप्रकरविच्छुरितंप्रियायाः॥१२॥ ॥

यांतदास्यंमुखंस्मरामिकुत्रविपरीतरताभियोगेविपरीतंपइतंसुरतंतस्यअभियोगःसंबंधस्तस्मिन·तदुक्तंरतिरहस्येइत्थंस्मरतसंमर्दसमुद्भूतपरिश्रमम·ज्ञात्वाधःकामिनंकान्तांकुर्वीतपुरुषायितम·किंभूतमास्यम्कनककुंडलघृष्टगंडम्कनककुण्डलाभ्यांस्वर्णकर्णपूराभ्यांघृष्टौचिह्नितौगंडौकपोलौयस्यतत्पुनःकिंभूतम्आन्दोलनश्रमजलस्फुटसान्द्रबिन्दुमुक्ताफलप्रकरविच्छुरितंम·॥ ॥आन्दोलनातयोनःपुन्यच्चालनात्उत्थितंयत्श्रमजलंघर्मवारितस्यस्फुटाव्यक्ताःसान्द्रानिबिडायेबिन्दवःअंबुकणाःवमुक्ताफलप्रकराःमौक्तिकसमूहा॥ ॥ ॥स्तैर्विच्छुरितंव्याप्तम्॥१२॥ ॥ ॥

DR BHAU DAJI

अद्यापिवल्लभायास्तत्स्मरामितत्किमूप्राणयमेगुरदृष्टिपातम्॥प्रणयेसुरतयाचनेसतिभंगुरंवक्रितंयदृष्टिपातंअवलोक
नंतत्स्मरामि॥प्रणयःप्रवसेप्राप्तियांचाविश्रंमयोरितिविश्वःनकेवलंतत्स्मरामिरतिविभ्रमगात्रभंगंचस्मामिरतोसुर
तेयोविभ्रमःविलासस्तेनमंगेशरीरंचालनंतंम्॥नकेवलंतत्स्मरामिवस्त्रांतरस्खलनचारुपयोधरांतरंचस्मरामिवस्त्रा
न्तरस्थठत्तरीयस्ययस्खलनंअन्यदेशगमनंतेनचारुरम्यतरोयःपयोधरान्तःकुचैदेकदेशस्तेनकेवलंतत्स्मरामिद
न्तानांछदःअधरस्तंकिंभूतंदन्तच्छदंदशनखंडनमंडनमदशनखंडनंदंतस्तंतदवमंडनंअलंकारोयस्ययत्रवासः
तवासमुच्चयार्थो॥१३॥अद्यापिदानीमपितांवल्लभांप्रयोस्मरामिकिंभूतांवल्लभांअशोकनवपल्लवरुक्करस्तांअशो

अद्यापितत्प्रणयभंगुरदृष्टिपातंतस्याःस्मरामिरतिविभ्रमगात्रभंगमवस्त्रान्तरस्खलनचारुपयो
धरांतंदन्तच्छदंदशनखंडनमंडनंवा॥१३॥अद्याप्यशोकनवपल्लवरुक्करस्तांमुक्ताकलापपरिचुंबित
चूचुकाग्रमश्रंतःस्मितोच्छ्वसितपांडुरगंडभित्तिंतांवल्लभामलसहंसगतिंस्मरामि॥१४॥ ॥

कस्यनवोनूतनोयःपल्लवःकिसलयंतद्वशंकोलोहितोहस्तोकरोयस्याःसाताम्·पुनःकिंभूतांमुक्ताकलापपरिचुंबित
चूचुकाग्रांमुक्ताकलापेभमुक्ताहारेणपरिचुंबितौसंसक्तौचूचुकाग्रंपयोधराग्रंयस्याःसाताम्·पुनःकिंभूतांम्·अन्तः
स्मितोच्छ्वसितपांडुरगंडभित्तिम्·अन्तःस्मितेनअभ्यंतरहसितेनउच्छ्वसितेनपुलकितेनपांडुरेणधूसरेणगंडभित्तीक
पोलप्रदेशौयस्याःसाताम्·तदुक्तम्·विकसितकपोलांतमृकुललोचनंचचयतकिंचिद्दीक्षितदन्ताग्रंहसितंतत्स्मि
तम्बिन्दुःभित्तिकुमेप्रदेशेचसंविभागावशयोरितिविश्वःपुनःकिंभूतांतांअलसहंसगतिम्अलसोमंदगमनेयो
हंसस्वस्यगतिरिवगतिर्यस्याःसांयद्वाहंसाप्रह्लत्येवमंदगतायोभवंतिउलसाहंसस्यगतिरिवगतिर्यस्याःसा
साताम्॥१४॥

अद्यापिदानीमपितस्याःप्रियावास्मरामि तत्किमनखरक्षतलक्ष्मरक्षतस्यकरहस्तुस्यलक्ष्मचिह्नंनतत्किंभूतंतत्य
स्तंआरोपितंकुत्रकनकरेणुद्यनोहदेशंकनककरेणुनाचन्दनपुंक्तसुवर्णधातुनाचर्चितोपाघनोहदेशःएक्षहभागस्तत्रशा
कपार्थिवादीनांसिद्धपंउत्तरत्रोपसंख्यानमितिवार्तिकेणलोपःस्वर्णशलाकामंतर्निक्षिप्यचंदनघृष्टैःक्रियतेकनककरेणुयो
गोभवति काश्मिन्येविस्तीर्णप्रस्थघनोद्वेचघनेइतिपदसंगारःपुनःकिंभूतंआरुरुहेमेरुरुचिरांबरमआरुरुक्षमाक्षिप्तेमेरुवत्स्ववर्णेव
तूरुचिरंमनोहरंअंबरंवस्त्रीयस्ययस्माद्वातत्पुनःकिंभूतंकरधृतमकरेणधृतंपिहितमकिंभूतायास्तस्याःअतएवलज्जावशा
द्व्रीडावशात्तत्तस्मात्स्थानादुत्थितापाःसत्याःव्रजंत्याःगच्छत्याःपेहातत्केवलंतस्याःस्वेनाधृष्टतंलक्ष्मतस्याःस्मरामिकिंतु
उत्थितापास्तरुचिरांबरमनोहरस्त्रीचस्मरामिकिंभूतंरुचिरांबरंआरुरुहेमआरोपितंहेमस्वर्णेपिंडवततपुनःकिंभूतंकरधृतंहस्ताव

अद्यापितत्कनककरेणुप्रनोहदेशेन्यस्तंस्मरामिनखरक्षतलक्ष्मतस्याःआरुरुहेमरुचिरांबरमुत्थितायाःलज्जा
वशात्करधृतंचततोव्रजंत्याः॥१५॥अद्यापितांविधृतकज्जलचारुनेत्रांप्रोत्फुल्लपुष्पनिकराकुलकेशपाशा
मसिंदूरसंतुलितमौक्तिकहारदंतामाधत्तहेमकरकोरहसिस्मरामि॥१६॥ ॥ ७ ॥

लंबितंभूकिंभूतायास्वस्यास्ततःस्थानाद्व्रजंत्याहस्तधारणानंतरंगछंत्याःहस्तेनवस्त्रामवलंब्यगछंतीत्यर्थः॥१५॥आघा
पिदानीमपरहसिएकांतेएतादृशींस्मरामिकीदृशींविधृतकज्जलचारुनेत्रांविशेषेणधृतावस्त्रीयोद्धतकज्जलंअंजनं
तेनचारुणीमस्तेनोरमेत्रेयस्याःसाताम्पुनःकिंभूतांम्प्रोत्फुल्लपुष्पनिकराकुलकेशपाशांम्प्रोत्फुल्लानीविकसितानियानि
पुष्पाणिकुसुमानितेषांनिकरःसमूहस्तेन आकुलोव्याप्तःपाशःकेशसमूहोयस्याःसांपुनःकथंभूतांसिंदूरसंतुलि
तमौक्तिकहारदंतांसिंदूरेणसंतुलितोतिशोभोयोमौक्तिकहारोमुक्तादामतेनसदृशादशनायस्याःसाताम्पुनःकिंभूतां
आधत्तहेमकरकांआधत्तानिपरिधत्तानिहेमकटकानिसुवर्णकिंकणानिपयासाताम्॥१६॥ ॥ ॥ ॥

चै० टि० ४ अद्यापिइदानीमपितांहरसिएकांतेस्मरामि॥कथंभूतामतांगलितबंधनकेशपाशांगलितंमुक्तबंधनं।बंधोयस्यायनद्दशःकेशपाशःशिरोरुहसमूहोयस्याःसाताम्।अतएववस्त्रस्तस्त्रजं।स्तस्माःगलिंस्तस्ताःगलितोमालायस्याःसाताम् पुनःकथंभूतामस्मितसुधामधुराधरोष्ठीहस्मितंईषद्धसनंतदेवसुधामृतंतयामधुरोरुचिरैकैः।अधरोष्ठःयस्यासाताम्·पुनःकथंभूतां·पीनोन्नतस्तनयुगोपरिचारिचुंबीमुक्तावलीस्यीनोविपुलोउन्नतोउच्चतरोयोस्तनोकुचोतःयोर्युगंमुगलंतस्योपरिचारुपनोरमंयथास्यंदेवंचुंबीनीसलग्नामुक्तावलीमुक्तहारोयस्याःसातां।पुनःकथंभूतांम।

अद्यापितांगलितबंधनकेशपाशांस्तस्तस्त्रजंस्मितसुधामधुराधरोष्ठीं॥पीनोन्नतस्तनयुगोपरि
चारिचुंबिमुक्तावलीरहसिलोलदृशांस्मरामि॥१७॥अद्यापितांधवलवेश्मनिरत्नदीपमालामयूख
पटलैर्दलितांधकारेस्वप्नोद्यमेरहसिसंमुखदर्शनोत्थांलज्जाचयार्त्तनयनामउचिंतयामि॥१८॥

लोलदृशीं।लोलंचंचलेदृशौनेत्रेयस्याःसाताम्॥१७॥अद्यापितांअनुचिंतयामि।कुत्रधवलवेश्मराजसदने।कथंभूतेधवलवेश्मनि।दलितः।विशीर्णोहृतःअंधकारोध्वानयस्ययत्रवा।ततस्मिनकैः।रत्नदीपमालामयूखपटलैः॥रत्नानिमणायएवदीपास्तेषांमालानिकरास्तस्यमयूखपटलानिकिणाजालानितैर्हतुभूतैः॥कथंभूतांतां।स्वप्नोद्यमेरहसिसंमुखदर्शनोत्थां॥ ॥अद्यमेस्वप्नःनिद्रातिकटमुद्राव्य।रहरिएकांतेसंमुखदर्शनेअभिमुखावःलोकनेउत्थायउत्तिष्ठयातां।पुनःकथंभूतामतएवलज्जाभयार्त्तनयनां॥लज्जायाएवभयंसाध्यसंतेनआर्त्तेनेत्रेचनेयस्याःसानां॥१८॥श्रींश्रीं॥श्रीरामजयरामजयजयराम॥ ७ ॥श्री॥ ॥७॥ ॥श्री॥

अद्यापितांस्मरामि।किंभूतांतां।विरह।वन्हिपीडितांगीविरहोवियोगः।सएववन्हिरनलस्तेनपीडितंसंतप्तमंगंदेहोयस्याःसांतांपुनःकथंभूतां·कुरंगनयनां·कुरंगस्यसारंगस्यनयनेयस्याःसांतांपुनःभर्त्रिकांता·सुरतैकपात्रं।सुरतस्यानियुवनस्यएकपात्रंश्रेष्ठाधारभूतांतां·पात्रशब्दोःजहत्लिंगोनपुंसकेवर्त्तते।पुनःकिंभूतांआवहंतींचारयंतीःकिंभूतां·नानाविचित्ररत्नमंडनं·नानाविचित्राणिअनेकविधानिते·रत्ननिर्मितखचितंवापन्मंडनंआभरणांतत्पुनःकिंभूतांराजहंसगमनां·राजहंसस्यगमनमिवगमनंयस्याःसांतांपुनःकिंभूतां·सुदतीशोभनाःदंताःयस्याःसांतांकुंदकुड्मलाग्रसदृशदशनामित्यर्थः॥१९॥अद्यापितां·कांतांस्मरामि।किंभूतांतां·क्षितितलेपृथिव्यां·सर्वांगसुंदरतयासर्वगात्रमनोहरतया·वरकामिनीनांश्रेष्ठनायिकानांमध्ये·प्रथमेकरेखा·प्रथमावासोएकश्रेष्ठचासोरेखाचता·पुनःकिंभूतां·शृंगारनाटककरसोत्तमपानपात्रं·शृंगारकेलिकर्मसएवेनाटकंनृत्यंतत्रसम

अद्यापितांविरहवन्हिनिपीडितांगीतन्वींकुरंगनयनांसुरतैकपात्रमनानाविचित्ररत्नमंडनमावहंतींतांराजहं
सगमनांसुदतींस्मरामि॥१९॥अद्यापितांक्षितितलेवरकामिनीनांसर्वांगसुंदरतयाप्रथमेकरेखाम् शृंगारना
टकरसोत्तमपानपात्रंकांतांस्मरामिकुसुमायुधबाणखिन्नां॥२०॥अद्यापिरतांस्तिमितवस्त्रमिवांगलग्नांप्रौ
ढप्रतापमदनानलतप्तदेहांबालामनाथशरणामनुकंपनीयांप्राणाधिकांक्षणमहंनहिविस्मरामि॥२१॥ ॥

स्तस्योत्तमपानपात्रं·पुनःकिंभूतां·कुसुमायुधबाणखिन्नां·कुसमायुधबाणैःपंचशरबाणैःखिन्नांतां॥२०॥अद्यापिइदानीमपि·तांमूर्त्तिमात्रंनहिविस्मरामि·किंभूतांतां·स्तिमितवस्त्रमिवआर्द्रवसनमिव·अंगलग्नां·अंगशरीरलग्नांसंमिलितांतां·पुनःकिंभूतांप्रौढप्रतापमदनानलतप्तदेहां·प्रौढप्रतापःउपचितापोरुषोयोमदनःकंदर्पःसएवानलस्तेनतप्तःदेहःशरीरंयस्याःसांतां·पुनःकिंभूतां·बालांषोडशवार्षिकीः पुनःकिंभूतां।अनाथशरणां।नग्नाःयःस्वामीशरणंरक्षकोयस्याःसांतं।अतएवअनुकंपनीयामनुग्राह्यां।पुनःकिंभूतां।प्राणाधिकांप्राणेभ्योधिकांगरिष्ठांतां।अतिप्रियामित्यर्थः॥२१॥

अद्यापि मतिर्हविधेर्ब्रह्मनसुकुमारगाच्या मदशरीरायास्तस्या राजपुत्र्या विरहनिर्वियोगजातोयस्तापोदारः। मसोढुं संतु नशक्यतइतिहेतोः। तामवनीशपुत्रीरानकुमारी॥ अद्यापिमरणसमयेपिप्रतिचिंतयामिस्मरामिकथंभूतांतां वरसुंदरीणा मुत्तमनायिकानांमध्येप्रथमतः पूर्वंस्नेहैकपात्रघटितां स्नेहस्यप्रेम्णः एकंमुख्यंयत्पात्रंभाजनंयोग्यभाजनयोः पात्रमित्य मरः। तद्रूपत्वेनघटितांनिर्मितां। त्वयाविधात्राइतिशेषः॥२२॥ अद्यापिइदानीमपि तांकांस्मरामि किंभूतांतां विहसिता विशेष णप्रहसितमुखीं पुनः किंभूतां कुचभारनम्रां कुचभारेण्ययोधरगौरवेणनम्रामवनतांतां पुनः कथंभूतांमुक्ताकलापधवलीकृतकं

अद्यापितांप्रथमतोवरसुंदरीणांस्नेहैकपात्रघटितामवनीशपुत्रीम्सोढुंविधेर्विरहजःसुकुमारगाच्यास्तापोन शक्यतइतिप्रतिचिंतयामि॥२२॥ अद्याप्यहंविहसितांकुचभारनम्रांमुक्ताकलापधवलीकृतकंठदेशाम्। तांकेलिमंदि रगतांसुकुमायुधस्यकोतांस्मरामिरुचिरोज्वलपुष्पकेतुम्॥२३॥ अद्यापिचादुशतदुर्ललितोचितार्थंतस्याःस्म रामिसुरतकूर्मविहृताया अव्यक्तनिस्वनितकातरकथ्यमानसंकीर्णवर्णरुचिरंवचनंप्रियायाः॥२४॥ ॥

ठदेशाम्मुक्ताकलापेनमुक्तासमूहेनधवलीकृतः अर्जुनकृतकंठदेशोयस्याःसातां पुनः किंभूतां केलिमंदिरगतां केलिमंदिरं क्रिडासदनंतत्रप्राप्तां पुनः किंभूतांतां कुसुमायुधस्यरुचिरोज्वलस्यपुष्पकेतुं रुचिरमनोहरउज्वलोअतिस्फीतापुष्पके तुःकुसुमपताकायाम्॥२३॥ अद्यापितस्याःप्रियायाः वल्लभायाः वचनंस्मरामि किंभूतंवचनं चादुशतदुर्ललितोचितार्थं चादुशतेनप्रियशतेनदुर्ललितःकृतसमादरःमनोहरोवाउचितोयोग्यःअर्थप्रयोजनंयस्यतत् पुनः किंभूतं अव्यक्त निस्वनितकातरकथ्यमानसंकीर्णवर्णरुचिरं अव्यक्तनिस्वनितेनगुदाशब्दितेनकातरंमंदंयत्कथ्यमानंतेनसंकीर्ण येवर्णाअक्षराणितैः॥ रुचिरमनोहरं किंभूतायाःतस्याः सुरतकूर्मविहृतायाः सुरतायाः संभिश्रान्तायाः॥२४॥

॥ श्रीं ॥ छं ॥ श्रीं ॥ छं ॥ श्रीं ॥ छं ॥ श्रीं ॥ छं ॥ ५

अद्यापिइदानीमपिनिधुवनेसुरते जन्मांतरेपिअन्यस्मिन्नपिजन्मनितामनुचिंतयामि किंभूतांतां सुरतजागरमीलिता क्षीं सुरतार्थंयोजागरस्तेनमीलितेमुद्रितेक्षिणीयस्याः पुनः किंभूतांशस्तांगयष्टिगलितांशुककेशपाशांशस्तोप्रशस्तोअं गयष्ट्याःशरीरश्रेष्ठात्गलितोअधःपतितोअंशुककेशपाशोवस्त्रशिरोरुहसमूहोयस्याःसातां पुनः किंभूतां शृंगारवारिरु हकाननराजहंसीं शृंगारएववारिरुहकाननं कमलवनंतस्यराजहंसींतां॥२५॥ अद्यापिइदानीमपि यदियुनर्दिवसावसा नेतांपश्यामि तदास्वर्गापवर्गैत्रिदशालयमोक्षोराजसुखंनस्मरामि नचिंतयामि किंभूतांतां प्रणयिनींप्रेमातिशययुक्तांपु नः किंभूतांमृगशावकाक्षीं मृगस्यशावोबालस्तस्याक्षिणीवाक्षिणीयस्याः सातां पुनः किंभूतांघीयूषपूर्णकुचकुंभयुगंबहंतीम् घीप् षमूमतंतेनपूर्णोपूरितोकुचकुंभोकुंभशदृशोकुचोतयोर्युगंयुगलंतद्धारयन्तीं अपवर्गस्त्यागमोक्षपरित्यमरः॥२६॥ हेधीराः सज्ज्ञानार्थंइ

अद्यापितांसुरतजागरमीलिताक्षींशस्तांगयष्टिगलितांशुककेशपाशांशृंगारवारिरुहकाननराजहंसीं जन्मांतरेनिधुवनेथनु चिंतयामि॥२५॥ अद्यापितांप्रणयिनींमृगशावकाक्षींपीयूषपूर्णकुचकुंभयुगंबहंतींपश्याम्यहंयदिपुनर्दिवसावसानेस्वर्गो पवर्गौनचराजसुखंस्मरामि॥२६॥ अद्यापिविस्मयकरींत्रिदशान्विहायबुद्ध्यैवलोहलतिमेकिमहंकरोमि जानन्नपिप्रतिमुहूर्तं महांतकोतेकोतिवल्लभतरेतिममेतिधीराः॥२७॥ अद्यापितांगमनभिन्नुदितांमदीयंमुग्धेवभीहरिणामिवचंचलाक्षींवाचां सखत्तद्विगलदश्रुजलाकुलाक्षींसंचिंतयामिगुरुशोकविनम्रवक्त्राम्॥२८॥

ताइतिअमुनाप्रकारेणमेमबुद्धिर्बुद्धवत्तादिहान्तकालेप्रतिमूर्तंवारंतांविस्मयकरीमाश्चर्यकरीबलवतिप्रकाशपतिइतियोजना किंकृत्वा त्रिद शान्देवान्वेधेविहायत्यक्त्वाइतिकेनप्रकारेणप्रकाशपति प्रमकान्तामभवल्लभाइति अत्रजानन्नपितवानपि अहंकिंकरोमि तस्माद्धीराः नहि ममनशक्यमिदंत्वदीयविस्मरणंममनिंदानकर्तव्यामान्यजनकृतनिंदापरिहारः यस्माद्भवन्एवसर्वज्ञाः इतिभावः॥२७॥ अद्यापितांरा जपुत्रीमेतादृशींस्मरामि किंरूपां मदीयंगमनंप्रति इतिअमुनाप्रकारेण उदीतांजनैः कथितांवाचंवनं श्रुत्वाआकर्ण्य भीरुहरिणामिवत्रस्त कुरंगामिव चंचलाक्षींइतस्ततः प्रसारिनयनाः किंभूतांतांस्वर्गंगामिति भ्रशमागछंतीं विशेषेण गलत्पतघतभुजलेनेन आकुलव्याप्तेक्षणी यास्याः सापश्चात्कर्मधारयः पुनः किंभूतांगुरुशोकविनम्रवक्त्रां गुरुशोकेविनम्रंनानादुःखेनातिविनम्रमवनतंवक्त्रंमुखंयस्याः सातां॥२८॥

चे० टि० ६

अद्यापितांस्मरामि किंभूतांता क्षणवियोगविषोषमेषां क्षणं मुहूर्तमात्रयथास्यादेवंवियोगोविश्लेषस्तस्माद्विषेणगरलेनउपमेपास
दृशितां पुनः किंभूतां संगेसंवंधेसति पुनः भृशवल्लभतरामत्यर्थं अमृताभिषिक्तां अमृतेनाभिषिक्तास्थापितांता अन्योपिविषार्तः सन्मर
तस्मान्नात्मस्थीभवतीत्यर्थः अतएवमज्जीवधारणकरी ममप्राणावलंबनकर्त्रीम् पुनः किंभूतां मदनातसततंद्रांतंद्रायुक्तां पुनः
किंभूतां संदतां शोभनदशानां सेवसंसारेत्यभिप्रायेणाह ब्रह्मकेशवहरेः किंकिंप्रयोजनं एषांस्मरणेनकिमपिप्रयोजनमपिप्राप्तः
ब्रह्मकेशवहराणांस्मरणंमुक्तिकरं मुक्तोसुखदुःखाभावः अतोनाकिमपिप्रयोजनं तस्याः स्मरणेनसुखमेव अतस्तामेवस्मरामि॥२८॥
गुणनसौंदर्यगुणनकान्तास्यकांतामुखस्यसदृशंतुल्यंवदनंमुखं जगतिसंसारे जातुकदाचिदपि दृशाचक्षुषा अद्यापि अद्य

अद्यापितांनौक्षणाद्वियोगविषोपमेपांसंगेपुनर्बहुतरामभृताभिषिक्तामम्मज्जीवधारणकरीमदनात्सततंद्रांकिंब्रह्मकेशव
हरेःसुदतींस्मरामि॥२९॥अद्यापिजातुनिपुणांपतताम्यापिदृष्टदृशाजगतिजातिविधेवधूनांमुसौंदर्यनिर्जितरतिंहि
जराजकान्तेर्नकांतास्यस्यसदृशंवदनंगुणेन॥३०॥अद्यापिराजगृहतोमपिनीपमानेदुर्वारभीषणकरेर्यम
दूतकल्पैःकिंकितर्थंवहुविधंनहतंमदर्थंवक्तुंनशक्यतइतिव्यथतेमनोमे॥३१॥अद्यापितांनिशिदिवाहृ
दर्यदुनेतिपूर्णेन्दुसुंदरमुखंमनवल्लभायाःलावण्यरायनिर्जितरक्षतकामदर्पभृयः पुरःप्रतिपदंनविलोक्यतेयत॥३२॥

पर्यंतमपिमायानदृष्टंनावलोकितं किंमतेनमपानिपुणंचातुर्यपूर्वकंयथास्यादेवं पतन्नापिपतेननिरूपयतापि कुत्रवधूनांसुं
दरीणां जातिविधेपद्मिन्यादिजातिविधानेपिकिंमतस्याःकांतास्यस्य सौंदर्यनिर्जितरतिंहिजराजकांतेः सौंदर्यणसुंदरतपाति
र्जितानितिरस्कृतारतिंहिजराजयोःकामपत्नीचंद्रयोःकांतिःशोभापेनतत्तस्याः॥३०॥ मदर्थंमन्निमित्तं तयाराजकन्यपावहुविधं
नानाप्रकारंकार्पण्यंकिंकिंनहतं अपितुअनेकप्रकारेणसर्वमेवहृतं तद्वक्तुंमपानशक्यतेनपार्यते इतिहेतोः अद्यापिइदानी
मपिममनश्चिन्तव्यथतेदुःखितंभवति। राजगृहतः राजसदनात् मपिनापमनसति कैः अंतःपुरचारिपुरुषैः किंभूतैः अतः
अंतःपुरचारिपुरुषैः दुर्वारभीषणकरैः अतिदुःसहभीषणकरैस्तैः अतएवयमद्भुतकल्पैः हृतांताकिंकरसदृशैः॥१॥३१॥ ॥ ६

ममवल्लभायास्तत्पूर्णेदुसुंदरमुखंसंपूर्णचंद्रमनोहरवदनंनिशिदिवा रात्रिदिनं हृदयंदुनोति उत्पीड्यति तत्किं यद्वदनंभूपः पुनरपि
प्रतिपदंप्रतिक्षणं पुरोध्येनविलोक्यतेनदृश्यते किंभूतंवदनं लावण्यंनिर्जितरतिः लावण्येनसौंदर्येणनिर्जितारतिः कामपत्नीयेन
तत् अतएवक्षतकामदर्पं क्षतः खंडितः कामस्यमदनस्यदर्पोगर्वोयेनमत्॥३२॥ अद्यापिचेतनचेतस्तेनमनसाहृत्वा तांत
प्रातेनप्रकारेणसंचिंतयामि यथाजन्मांतरेपिअन्यस्मिन्नपिजन्मनि ममसेवगतिः स्यात् तदुक्तंवर्गायतां कथंभूतांता अवहि
तांस्त्रीगुणैरपंडितां पुनः कथंभूतां युवतीम् तरुणीम् पुनः किंभूतां ममजीविताशाम् ममजीविते ममजीवने आशाः प्रत्याशायस्याः सा
तां पुनः किंभूतां नान्योपभुक्तनवयौवनभारसान् अन्येनउपभुक्तः नवयौवनभारस्यसारः स्थिराशोयस्याः सातां॥३३॥अद्यापिक्ता

अद्यापितांनिशिदिवाहृदयंदुनोतिपूर्णेन्दुसुंदरमुखंमनवल्लभायाःलावण्यरायनिर्जितरतिंक्षतिकामदर्पभृवःपुरःप्रति
पदंनविलोक्यतेपत्॥३२॥अद्यापितांमविहतांमनसाचेतनसंचिंतयामियुवतींममजीविताशांमृनान्योपभुक्तनवयौ
वनभारसारांजन्मांतरेपिममसेवगतिर्पथा स्यात्॥३३॥अद्यापितहृदनपंकजगंधलुब्धाभ्राम्यद्विरेफचपचुंबितगंडयु
ग्ममलीलावधूतकरपल्लवकंकणानांक्वाणेपिमूर्छतिमतःसुरतोमदीपम्॥३४॥अद्यापिसानखपदंस्तनमराउलेयद
तेपास्यमधुनानविमोहतेनउद्भिन्नरोमपुलकैर्बहुभिःप्रयत्नाज्जागर्त्तिरक्षतिविलोकयतेस्मरामि॥३५॥ राम ॥

णेपिमदीमनःस्मरतोमूर्छतिमोहयुक्तंकरोति कथंयथास्यात् तद्वनपंकजगंधलुब्धाभ्राम्यद्विरेफचपचुंबितगंडयुग्मंयथास्यात्तथा त
द्वदनपंकजगंधेलुब्धाःलंपटाःसंतःभ्राम्यंतः यद्विरेफाभ्रमरास्तेषांचपेनसमूहेनचुंबितंगंडयुग्मंयत्रक्रियांतत् केषांक्वाणःलिलावधूत
करपल्लवकंकणानांलितपाविलासेनअवधूतोचालितोयोकरपल्लवोपल्लवसदृशकरोनयोः कंकणाःनिवलयानितेषाम्॥३४॥
अद्यापिअहमितिस्मरामि शातिर्शतिकिं सावेदवनखपदंनखक्षतप्रयत्नाद्यत्नात् विलोकयतिचजागर्त्तिचरति
स्मरामि तत्किंनखपदं प्रथातत्स्तनमंडलदत्तन्यस्तं कथंभूतेनमया अस्यमधुपानमुखमलमधुपानंमुखमलमधुपानेतनविमोहि
तः भ्रांतचित्तेन कथंभूतास्मः बहुभिर्बाजलैः उद्भिन्नरोमपुलकैः उद्भिन्नरोमांचैर्लक्षिता लक्ष्येणतृतीयास्यात्॥३५॥ ॥

अद्यापि अहमिति स्मरामि । इतीतिकिम् । कोपविमुखीकृतगंतुकामासती पदेवपर्वप्रथमंउक्तवचोप्रतिददातिप्रत्यक्षतरंनप्रयच्छति तदेव चुंबामि मुखकमलमित्यर्थः यदामृशंरोदिति तदोहप्रियंतेमप्राणवल्लभेनवदासोहंमांनजानुग्रहाण इत्युक्तात्स्याः पदेचरणयुगे पतितोस्मि इत्यहंस्मरामि कापविमुखीकृतगंतुकामेति कोपनक्रोधेनाविमुखीकृताउदासीकृताचासौगंतुकामौचेतिविग्रहः ॥३६॥ अद्यापि मम मनइतिहेतोः धावतिगच्छति अत्रकिमहंकरोमि इतिकस्माद्धेतोः मदीयकात्सखीभिः सहैवासगृहे अतिअत्यर्थंपानुगच्छत्यति किंभूते वासगृहेसकांते शोभनाकांतामत्प्राणेश्वरीयुक्तेतस्मिन् पुनः किंभूते कांताप्रगीतपरिहासविचित्रनृत्ये कांताभिः प्रगीताकृतोयुः परिहासः सएवविचित्रंअद्भुतंनृत्यंनाटकंयत्रतत्तस्मिन् पुनः कथंभूते क्रीडाभिरागे क्रीडाया अभिरामंमनोहरमेतस्मिन् ॥३७॥ अ

अद्यापिकोपविमुखीकृतगमंतुकामौनोक्तवचः प्रतिपदानिपदैवपर्वम् चुंबामिरोदितमृशंपतितोस्मिपादे दासस्त
वप्रियतमेभजमांस्मरामि ॥३६॥ अद्यापिधावतिमनः किमहंकरोमिसाईसखीभिरतिवासगृहेसुकांतेकांताग्रगीत
परिहासविचित्रनृत्यक्रीडाभिरामइतियातुमदीयकात्तः ॥३७॥ अद्याप्यरंनखलुवेधसिकिमीशपत्नीन्नायागतासुरपतेरपि
रूष्णलक्ष्मीः धात्रीवाकिंत्रिजगतिः पारमोहनायसानिर्मितायुवतिरत्नमिदं दृशंयावा ॥३८॥ ॥अद्यापितांजगतिवर्णयि
तुंनकश्चिदलंक्षमोत्यहंदृशंसदृशींचपरिग्रहंमे दृष्टंहयोः सदृशयोः खलुयेनरूपंशक्रोभवेद्यदिएवपरंतुमान्यः ॥३९॥

द्यापि अहंखलुनिश्चयेन साकाभवति इतीतिकिं सुरपतेरिंद्रस्यशापगतापत्नीरूर्वशीकिं अथवाकृष्णलक्ष्मीः किम धात्रेवत्र
त्रेणत्रिजगतस्त्रैलोक्यकस्यपरिमोहनायवशीकरणायनिर्मिताकिं अथवाकिं युवतीरत्नदृलया स्त्रीश्रेष्ठारत्नइयमिदृशयास्व
ष्टेति ॥३८॥ ॥अद्यापिमेमतांपरिग्रहंपत्नीम् जगतिसंसारे वर्णयितुंगुणातिशयंप्राप्तायितुं कश्चित्कोपिनशक्तोस्ति किंभूतो
अदृसदृशी नदृष्टासदृशीतुल्यायस्याःसातादृग्वर्णयितुंपिकः शक्तइत्याह खलुनिश्चयेयेनइयोरुभयोः सदृशयोस्तुल्ययोंयु
रूपेदृष्टं सएवपरंकेवलं यदिशक्तोभवेत् ननुअन्यः कश्चित्तस्यारूपंवर्णयितुंशक्तोनभवेत्इत्यर्थः परिग्रहश
ब्दोऽजातिलिंगः पत्नीवाचकः पुंसिवर्त्तते इति ॥३९॥

॥ ७

अद्यापिममहृदयेइतिविषादोस्ति अन्याभिर्नायिकाभिस्तदीयरूपंउपमितुंउपमानंकर्तुंमयानावशक्यं नपार्थमिति कस्मिन् जगतिसंसारेसुंदरलक्ष्मपूर्णेसति सुंदराणांलक्ष्मसंख्यानंतेननपूर्णीव्याप्तेतस्मिन् कथंभूतेजगति अन्योन्यवरगुणाधिक संप्रपन्ने अन्यस्यथोपीवरगुणाःस्युःगुणास्तेयाम् आधिक्यंअतिशयस्तस्मिन्संप्रपन्न प्राप्तेतस्मिन् चशब्दःपदपूरणेअहो इतिकष्टे॥४३॥अद्यापिसाप्रियराजहंसी किंचिद्रमेकिंचिद्रमंनंप्रथयंतिख्यापयति कस्मात् मत्स्वांतसारसवत्सद्विरहोच्चपंकात् ममस्वांतंअंतकरणंतदेवसारसंकुशयंतस्मिंश्चलन्प्रचुभवंवासोविरहश्वसएवउच्चपंकः महत्कर्दमस्यात्कथं भूतासा नवयौवनंसुंदरांगी नवयौवनेमत्तस्फुरत्तारुण्येतसुंदरेमनोहरअंगात्रंयस्याः साःपुनःकथंभूतोमरोमांचवीचिविल

अद्याप्यहोजगतिसुंदरलक्ष्मपूर्णेचान्योन्यवरगुणाधिकसंप्रपन्नेअन्याभिरप्युपमितंनमयावशक्यंक
पंतदीयमितिमेहृदयेविषादः॥४३॥अद्यापिसानवयौवनसुंदरांगीरोमांचवीचिविलसच्चपलांगयष्टिःम
त्स्वांतसारसवत्सद्विरहोच्चपंकाकिंचिद्रमंप्रथयतिप्रियराजहंसी॥४४॥अद्यापितांनृपतिशेषरराजपु
त्रीसंपूर्णयौवनमदालसघूर्णनेत्रम् गंधर्वयक्षसुरकिंनराजकन्यांसाक्षान्नभोत्रपतितामिव
चिंतयामि॥४५॥

सच्चपलांगयष्टिःरोमांचएवीचिःकल्लोलःतयाविलसंतीचपलाचंचलाअंगपष्टिर्यस्याःसा॥४४॥अद्यापिइदा
नीमपि तांनपश्यतिशेखरराजपुत्रीस्मरामि नृपतिरोषराणांभूमिपालश्रेष्ठानांराजातस्यपुत्रीतांकथंभूता
तासंपूर्णमदालघूर्णनेत्रा संपूर्णेयौवनेमदालसेनअलसेघूर्णेनेत्रेयस्याःसातांपुनःकथंभूतामिव साक्षात्प्रत्य
क्षेणभोनिपातिता ॥गंधर्वयक्षसुरकिंनरराजकन्यामिव गंधर्वाश्चयक्षाश्चसुराश्चकिन्नराश्चेन
द्राराजशतमन्युस्तस्यकन्यातामिव॥४५॥ छ ॥ श्री ॥ छं ॥ श्री ॥ छं ॥ श्री ॥ छं ॥ श्री ॥

अद्यापिइदानीमपि तांसुनासिकांनिशिदिवारात्रिदंनहिविस्मरामि कथंभूतांता प्रणयिनीप्रेमयुक्तो पुनःकिंभूतांहृ
शंवेदिमध्यांहृशःवेदिमन्मध्यायास्याःसातां पुनःकथंभूतां उत्तुंगसंभृतसुधास्तनकुंभयुग्मां उत्तुंगौउच्चतरौसंभृतौअ
न्योन्यमांसितोसुधापूरितौयौस्तनकुंभौतयोर्युग्मंयस्याःसातांपुनःकिंभूतां नानाविचित्रहृतमंडनमंडितांगीं नानाविचित्र
हृतान्यनेकरूपहृतानियानिमंडनानितैर्मंडितमलंहृतमंगंयस्याःसातां॥४६॥अद्यापिइदानीमपि तांप्रमदांस्मरामि
प्रहर्षोमहोयस्याःसातां कथंभूतांतां मज्जीवमौषधिमिवममप्राणरक्षणेषजतुल्यांरवशब्दःसादृश्ये पुनःकिंभूतां कन
कक्रांतिध्वतसांगीं कनककांतिःस्वर्णशोभाधृतायेनेतादृशमतसमंगंयस्याःसातांपुनःकिंभूतां व्रीडोत्स्फुर्तां व्रीड

अद्यापितांप्रणयिनींहृशंवेदिमध्यामुत्तुंगसंभृतसुधास्तनकुंभयुग्मंमृनानाविचित्रहृतमंडनमंडितांगींसु
तोष्यितांनिशिदिवानहिविस्मरामि॥४६॥अद्यापितांकनककांतिध्वतसांगींव्रीडोत्स्फुर्तांमदनभीतिविकं
पमानामूअंगांगसंगपरिचुंबनजातमोहांमज्जीवनौषधिमिवप्रमदांस्मरामि॥४७॥अद्यापितत्सुरतकेलिनि
रस्त्रयुद्धंबंधोपबंधपवनोत्थितशून्यहस्तामुदंतोष्ठपीडननखक्षतरक्तसिक्तंतस्याःस्मरामिरतिबंधुरतिष्ठुरत्वम्॥४८॥

याऽत्सुकाउत्कंठितातां पुनःकिंभूतां मदनभीतिविकंपमानां मदनात्कंदर्पात् यामीतिःभयंयाविकंपमानातां पुनःकिंभूतां अंगां
गसंगपरिचुंबनजातमोहां अंगागसंगेनातिंगनविशेषणयचुंबनेनजातोमोहोज्ञानाभावोयस्याः साताम्इतिविग्रहः॥४७॥
अद्यापिइदानीमपि तत्स्यात्सुरकेलिनिरस्त्रयुद्धंस्मरामि सुरकेल्यांनिधुवनव्रीडायांनिरस्त्रमस्त्रशून्यंचतत्यद्धंचतत् किंभूतं
सुरकेलिनिरस्त्रयुद्धं बंधोपबंधयत्नोत्थितशून्यहस्तं बंधःपंकजानादिरूपबंधेरेतत्रभेदस्ताभ्यांयेतपनोत्थितेनपनोत्पोने
ताभ्यांशून्याःहस्ताःयत्रतत् पुनःकिंभूतं दंतोष्ठपीडननखक्षतरक्तसिक्तं दंतैः यतओष्ठपीडनंतस्यैर्यानिक्षतानितेषांरक्तंरुधिरंते
नसिक्तं पुनःकिंभूतां रतिबंधुरनिष्ठुरत्वं रत्यासुरतनबंधुरंमनोहरंनिरत्वंयत्रतत्॥४८॥ ॥ ५

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अद्यापिइदानीमपि अहंक्षणंमुहूर्त्तं वरवधूसुरतोपभोगमंतरेणउन्मांगनासुरतोपभोगंविना अंन्यविधिना अन्यप्रकारेण
नजीवामिप्राणयुक्तोनभवामि तत्तस्मात्कारणात् हेभ्रांतः ममसदुःखशांत्येदुःखोपशमाय अत्रजीवनमंदः मरणमेव मवतस्त्वतो
वित्तापयामि प्रार्थयामि मांत्वरितंशीघ्रंतुनीहि छिंद्धि एतावतादुःखशांतिभविष्यतीत्यर्थः॥४९॥तवउक्तेनस्माकंकिंफलमित्यत
आह अद्यापिनोमुनीतिसुहृतिनः यंहितोजनाः अंगीकृतस्वीकृतं यावज्जीवंपरिपालयंतिरक्षंति तद्दृष्टांतंदर्शयितुमाह हरोमहा
देव अद्यापिइयंतंकालंयावत् कालकूटंगरलं येनुतिनित्यजति किल किलेतिपुराणादौश्रुयते समुद्रमथनेनकालकूटउत्थितस्तेजसात्रै
लोक्यंदग्धमुपक्रांतंतंशंभुंकोपिनशशाकतद्धारणपुराहरेणांगीकृतंतमप्यद्यापिहरोनत्यजति। अपरदृष्टांतमाह खलुनिश्चयं कू

अद्याप्यहंबरवधूसुरतोपभोगंजीवामिनान्यविधिनाक्षणमंतरेणतछात्रमेमरणमेवहिदुःखशांत्येवित्ता
पयामिभवतस्त्वरितंतुनीहि॥४९॥अद्यापिनोजुतिहरः किलकालकूटंकूर्मोविभर्त्तिधरणीखलुपृष्ठेके
न॥अंभोनिधिर्वहतिदुःसहवाडवाग्निमंगीकृतंसुहृतिनः परिपालयंति॥५०॥ इतिश्रीचोरमहाकवि
नाविरचिताश्लोकपंचासिकासमाप्ता॥

मः कच्छपः कृष्णनेकेन कृत्वा धरणीं भूमिं अद्यापिश्वेतंदिवसंयावत् विभर्त्तिधारयति कूर्मरूपिणाविष्णुनापुराश्वे
नपृथिवीधारयिष्यामिइत्यंगीकृतंसोद्यापितांधरणीं धारयत्येवनत्यजति अपरदृष्टांतमाह अंभोनिधिः समुद्रः अद्यापि
यंतंकालंयावत् वाडवाग्निंवाडवरूपिणमग्निंविभर्त्तिधारयति किंभूतंवाडवाग्निंदुःसहंशोढुमशक्यं वाडवरूपोग्निः समुद्रेति
ख्यातइतिपुराणिकीर्तिप्रसिद्धं सोद्यापितंरक्षति अतयुष्माभिरयंपदंगीकृतमस्तितत्परिपालनीयमितिवक्तुराशयः॥
इतिश्रीसमस्तविद्याविदमार्त्तंडखंडितविद्यासिसर्वविपक्षिजनोपकारसंतुष्टहृत्सहृदयहृत्मणतमूरसूरिरामो
पाध्यायसनुनारायणपतिनाचरचितविलासिजनाचित्तकैरवचंद्रिकाचोरपंचासिकायाःटीकासंपूर्णः॥शिवसंवत्
॥ ॥ ॥